तद्दिव श्यामं तच्छनैः संराध्यं वशीकर्त्तुमयोग्यं दुर्ग्रहत्वात् २८ । बुद्धेरुत्पत्तिपूर्व्वकं लक्षणमाह तैजसादितिद्वाभ्याम् हे सति ! । द्रव्यस्फुरणरूपं विज्ञानमिति चित्तव्यावृत्त्यर्थमुक्तम् । इन्द्रियाणामनुग्रह इति सविकल्पज्ञाने हृषीकाणामधीश्वर इति यदुक्तं तत्तु निर्व्विकल्पकज्ञाने २९ । द्रव्यस्फुरणस्यैव प्रपञ्चः संशयादिः । विपर्य्यासो मिथ्याज्ञानं निश्चयः प्रमाणज्ञानं स्वापो निद्रा, "प्रमाणविपर्य्ययविकल्पनिद्रास्मृतयः" इति पातञ्जलोक्तेः ३० । इन्द्रियाणामुत्पत्तिमाह तैजसाहङ्काराज्जातानि वैकारिकत्वशङ्कानिवृत्त्यर्थमेवकारः द्विविधान्यपीन्द्रियाणि तैजसान्येवेत्यर्थः । तत्र हेतुः प्राणस्येति हि यस्मात्प्राणस्य क्रियाशक्तिर्बुद्धेर्विज्ञानशक्तिता अतः प्राणस्य तैजसत्वात् तदीयशक्तिमतामिन्द्रियाणां तैजसत्वम् । तथा बुद्धेस्तैजसत्वात् तदीयज्ञानशक्तिमतामपि ज्ञानेन्द्रियाणां तैजसत्वमपीत्यर्थः ३१ । तन्मात्रोत्पत्तिपूर्व्वकमाकाशादिमहाभूतोत्पत्तिन्तल्लक्षणञ्चाह । तामसादिति पञ्चभिः । श्रोत्रन्तु शब्दगमित्यादिभिर्विषयोत्पत्त्यनन्तरं तत्सम्बन्धमात्रं कथ्यते न तूत्पत्तिः प्रागेवोत्पन्नत्वात् शब्दं गच्छति प्राप्नोतीति शब्दगम् ३२ । शब्दस्य लक्षणमाह अर्थाश्रयत्वं अर्थवाचकत्वं, द्रष्टुर्लिङ्गत्वं कुड्यान्तरितस्य द्रष्टृज्ञापकत्वं तदुक्तं "लिङ्गं यद् दृष्टृदृश्ययोरिति, नभसः तन्मात्रत्वं सूक्ष्मत्वं शब्दस्य लक्षणमित्यन्वयः ३३ । छिद्रदातृत्वमवकाशदातृत्वं बहिरान्तरव्यवहारास्पदत्वम् आत्मा मनः । प्राणादीनान्धिष्ण्यत्वमाश्रयत्वं नाड्यादिच्छिद्ररूपेण वृत्तिः कार्य्यमेतल्लक्षणम् । एवमुत्तरत्रापि एकेन श्लोकेन तन्मात्रमहाभूतयोरुत्पत्तिः द्वितीयेन तन्मात्रलक्षणं तृतीयेन महाभूतलक्षणं इत्यनुसन्धेयम् । आकाशात्त्वक्स्पर्शस्य संग्रहः सम्यग्ग्रहणं यया पुंस्त्वं नियतलिङ्गत्वात् । यद्वा स्पर्शस्य संग्रहस्ततोभवतीति शेषः । शब्दतन्मात्रादित्यादि तन्मात्राणामुत्तरोत्तरान्वयार्थमुक्तम् ३५ । स्पर्शत्वं स्वरूपलक्षणमित्यर्थः । नभस्वतो वायोस्तन्मात्रत्वञ्च ३६ । चालनं वृक्षशाखादेः । व्यूहनं मेलनं तृणादेः प्राप्तिः संयोगः द्रव्यस्य गन्धवतोघ्राणं प्रति नेतृत्वं यथा शैत्यादिमतः स्पर्शनं, शब्दस्य श्रोत्रं प्रति नेतृत्वं सर्व्वेन्द्रियाणामात्मत्वम् उपोद्बलकत्वं कर्म्मणा कार्य्येणाभिलक्षणं भावे ल्युट् । कर्म्मैवाभिलक्षणमिति विग्रहे तु करणे ३७ । द्रव्याकृतित्वं द्रव्यस्याकारसमर्पकत्वं गुणता द्रव्योपसर्जनतया प्रतीतिः शब्दस्य तु स्वातन्त्र्येणैव प्रतीतिः । अप्रत्यक्षद्रव्यस्य स्पर्शादेरपि स्वातन्त्र्येणैव प्रतीतिः रूपस्य तु नैवमिति तस्यायं विशेषउक्तः । व्यक्तिसंस्थात्वं द्रव्यस्य या संस्था सन्निवेशः सैव संस्था यस्य द्रव्यपरिणामतया प्रतीतिरित्यर्थः । तेजसस्तेजस्त्वमसाधारणत्वम् ३८ । द्योतनं प्रकाशनं पचनं तण्डुलादेः क्षुत्तृट् अशनाया पिपासा च तद्द्वारेण पानमदनञ्च ३९ । जिह्वा रसनेन्द्रियं रसोगृह्यतेऽनेनेति रसग्रहस्ततो भवतीत्यर्थः ४० । कषायादिषु लवणोऽपि द्रष्टव्यः । भौतिकानां संसर्गिद्रव्याणां यएकोमधुरएव सन् अनेकधा भिद्यते स रसइत्यर्थः ४१ । क्लेदनमार्द्रीकरणं मृदादेः पिण्डीकरणं तृप्तिदातृत्वं प्राणनं जीवनम् "आपोमयः प्राण" इति" श्रुतेः आप्यायनं तृड्वैक्लव्यनिवर्त्तनं उदनं मृदुकरणम् उन्दनमितिपाठे सएवार्थः । भूयस्त्वं कूपादावुद्धृतस्यापि पुनःपुनरुद्गमः ४२ । गन्धगः गन्धं प्राप्नोति ४३ । करम्भोमिश्रगन्धः यथा व्यञ्जनादीनां हिङ्ग्वादिसंस्कारेणैव । पूतिर्दुर्गन्धः सौरभ्यं कर्पूरादेः, शान्तः शतपत्रादेः, उग्रो लशुनादेः, संसर्गिणां द्रव्यावयवानां वैषम्यात् यएवं विभिद्यते स गन्धइत्यर्थः ४४ । ब्रह्मणोभावनं प्रतिमादिरूपेण साकारतापादनं, स्थानं जलादिविलक्षणतया नैरपेक्ष्येण स्थितिः । धारणं जलाद्याधारत्वं सतामाकाशादीनां विशेषणमवच्छेदकत्वं प्राणिनां तत्तद्गुणानाञ्च पुंस्त्वादीनामुतद्भेदः परिणामविशेषैः प्रकटीकरणम् ४५ । श्रोत्रादीनां शब्दादिग्राहकत्वमुक्तं तेषाञ्च लक्षणमेतदेव इत्याशयेनाह पञ्चभिः श्लोकार्द्धैःनभसोगुणविशेषः शब्दोयस्यार्थोविषयः ४६ । गुणविशेषं शब्दव्यावृत्त्यर्थं दर्शयति परस्य कारणस्य धर्म्माः शब्दादिः अपरस्मिन् कार्य्ये वाय्वादौ कारणान्वयाद् दृश्यते अतोभावानामाकाशादीनां विशेषगुणः सर्व्वोऽपि शब्दादिः भूमावेवोपलभ्यते चतुर्णां तत्रान्वयात्, जलादिषु यथान्वयमेव न सर्व्वम् आकाशेऽन्यान्वयाभावेन एकएवेति ४७ । एवं कारणोत्पत्तिमुक्त्वा कार्य्योत्पत्तिमाह सार्द्धैस्त्रिभिः । एतान्यसंहत्य अमिलित्वा यदा स्थितानि तदा जगदादिरीश्वरः प्राविशत् सप्तेति प्राधान्याभिप्रायेणोक्तं प्रवेशस्तु सर्व्वेष्वपि विवक्षितएव ४८ । अनुविद्धेभ्यः क्षुभितेभ्यः यस्मादसौ विराट्पुरुष उदतिष्ठत् ४९ । भगवतोरूपमिति पुरुषाभेदाभिप्रायेण ५० । तस्मिन्नध्यात्मादिविभागमाह हिरण्मयादिति नवभिः । उत्थाय औदासीन्यं विहाय, तमाविश्य अधिष्ठाय । महांश्चासौ देवश्चेति खं छिद्रम् ५१ । वाण्या सह वह्निरभवत् प्राविशत् । नासे निरभिद्येतां प्राणोतः प्राणेन ऊतः स्यूतः सन् प्राणएतयोर्नासिकयोरभवदित्य-